# Central Board of Secondary Education

## (CBSE)

### Board Examination - (March)

**Series : RTM**

**Set A**

**Code No. - SAN-122**

**Roll No.** | | | | | | | |

**Candidates must write the code on the title page of the answer-book.**

**कक्षा : दशमी**

**संस्कृतम**

**आदर्श–प्रश्न–पत्रम्**

**समय : होरात्रयम्** **सम्पूर्णाङ्काः –80**

**सामान्यनिर्देशा :–**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 7 पृष्ठानि मुद्रितानि सन्ति ।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
- प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।

**प्रश्नपत्रस्वरुपम् –**

| | | | |
|---|---|---|---|
| **खण्डः क** | : | **अपठित – अवबोधनम्** | **10 अङ्काः** |
| **खण्डः ख** | : | **रचनात्मकार्यम्** | **15 अङ्काः** |
| **खण्डः ग** | : | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **खण्डः घ** | : | **पठित–अवबोधनम्** | **30 अङ्काः** |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

**Published by - Educare Publication** **Developed by - Resource Person of CBSE Board**

**खण्ड – क (अपठितांश – अवबोधनम्)**

**प्र.१) अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत –** **(१०)**

कालिदासः मेघदूतं रचितवान् । मेघदूते मानसूनविज्ञानस्य अद्भुतं वर्णनम् अस्ति । मानसूनसमयः आषाढमासात् प्रारभते । श्याममेघान् दृष्ट्वा सर्वे जनाः प्रसन्नाः भवन्ति । मयूराः नृत्यन्ति । मानसूनमेघाः सर्वेषां जीवानां कष्टम् अपहरन्ति । मेघानां जलं वनस्पतिभ्यः, पशुपक्षिभ्यः किं वा सर्वेभ्यः प्राणिभ्यः जीवनं प्रयच्छति । मेघजलैः भूमेः उर्वरा शक्तिः वर्धते । क्षेत्राणां सिञ्चनं भवति । गगने यदा कदा इन्द्रधनुषः अपि दृश्यते । वायुः शीतलः भवति । शुष्कभूमौ वर्षायाः बिन्दवः पतन्ति । भूमेः सुगन्धितं वाष्पं निर्गच्छति । कदम्बपुष्पाणि विकसन्ति । तेषु भ्रमराः गुञ्जन्ति । हरीणाः प्रसन्नाः भूत्वा इतस्ततः धावन्ति । चातकाः जलबिन्दून् पिबन्ति । बलाकाः पंक्ति – बद्ध्वा आकाशे उड्डीयन्ते । मेघदूते मेघः यक्षस्य सन्देशं नयतु इति प्रार्थितः । अतः कालिदासः वायुमार्गस्य ज्ञानवर्धकं वर्णनं करोति ।

**प्रश्नाः**

**I)** एकपदेन उत्तरत – **(1 x 2 = 2)**

(i) मेघानां जलं प्राणिभ्यः किं प्रयच्छति ?

(ii) भ्रमराः कुत्र गुञ्जन्ति ?

**II)** **पू**र्णवाक्येन उत्तरत – **(2 x 2 = 4)**

(i) भूमेः किं निर्गच्छति ?

(ii) मेघदूतं कः रचितवान् ?

**III)** **प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत –** **(1 x 3 = 3)**

क) अन्तिमवाक्यात् अव्ययपदं चित्वा लिखत ।

(i) अतः (ii) वर्णनम् (iii) ज्ञानवर्धकम् (iv) किमपि न

ख) ज्ञानवर्धकम् इति कस्य विशेषणम् ?

(i) वर्णनम् (ii) सिञ्चनं (iii) कालिदासः (iv) कस्यापि न

ग) धावन्ति इति क्रियापदस्य कर्ता कः ?

(i) हरिणाः (ii) प्रसन्नाः (iii) इतस्ततः (iv) किमपि न

**IV)** उपयुक्तं शीर्षकं – अस्य अनुच्छेदस्य कृते एकं समुचितं शीर्षकं लिखत । **(1)**

**खण्ड – ख (रचनात्मककार्यम्)**

**प्र.२) मित्रं प्रति अधोलिखितं पत्रं मञ्जुषा पदसहायतया पूरयित्वा पुनः लिखत –** **($^1/_2$ x 10 = 5)**

(i) _________

प्रिय मित्र (ii) _________ ।

अत्र सर्व कुशलम् । भवान् अपि तत्र कुशली इति मन्ये । गतसप्ताहे (iii) _________ विद्यालये संस्कृतसम्भाषण – शिविरम् आयोजितम् (iv) _________ । दशदिनानि वयं (v) _________ सम्भाषणस्य अभ्यासम् अकुर्म । तत्र एकस्याः लघुनाटिकायाः (vi) _________ अभवत् । अहं तु विदूषकस्य (vii) _________ कृतवान् । अहम् इदानीं सर्वदा संस्कृतेन एव (viii) _________ । मम शिक्षकाः अपि मयि स्निह्यन्ति । भवान् अपि संस्कृतेन (ix) _________ प्रयत्नं करोतु । पितरौ (x) _________ मम प्रणामाञ्जलिं निवेदयतु ।

| |
|---|
| **मञ्जूषा** – सम्भाषणस्य, अस्माकम्, वदामि, प्रति, हैदराबादतः, अभिनयम्, सौरभ ! मञ्चनम्, आसीत्, संस्कृतेन ! |

| | |
|---|---|
| प्र.३) | **अधः प्रदत्तम् चित्रम् आधृत्य मंजुषायां प्रदत्तशब्दानां सहायतया पञ्च** संस्कृतवाक्यानि लिखत – **(2 x 5 = 10)** |



**मंञ्जूषा**

वृक्षः, पर्वताः, सुर्यः, तृणानि, पुष्पाणि, मधुपः, खगाः, आकाशे

**अथवा**

**'परोपकारः' इति विषयम् अधिकृत्य मञ्जूषायां** प्रदत्तशब्दानां सहायतया पञ्च **वाक्यानि संस्कृतेन एकम् अनुच्छेदं** लिखत ।

**मंञ्जूषा**

परेषाम् उपकारः, महाराजा शिविः, कपोतः, श्येनाय, व्यासस्य वचनद्वयम्, अष्टादशपुराणेषु, कर्तव्यम्, अस्माभिः

प्र४) हिन्दी भाषाया लिखितानां प**ञ्चसरल वाक्यानां संस्कृतभाषायाम् अनुवादः क्रियताम ।** **(1 x 5 = 5)**

(i) वेदों को पढकर वह विद्वान हो गया ।
(ii) हे बालक ! तू सिंह को देखकर क्यों रोता है ?
(iii) मैं पुस्तक लेकर आपके सामने पढ़ुँगा ।
(iv) राम ने यह अध्ययन समाप्त कर गुरु दक्षिणा दी ।
(v) वन सुनकर भी नहीं बोली ।

## खण्ड – ग (अनुप्रयुक्त व्याकरणम्)

प्र.५) **अधोलिखितेषु वाक्येषु स्थूलपदेषु सन्धिं / सन्धि-विच्छेदं वा कुरुत । (केवल प्रश्नचतुष्टयम्)** **(1 x 4 = 4)**

क) रामः + च लक्ष्मणश्च वनं गतौ ।
ख) वने मृगाः + चरन्ति ।
ग) विद्यालयस्य वातावरणं स्वच्छं भवति ।
घ) मूर्खेण पुत्रेण कोऽर्थः ?
ङ) तच्छ्रुत्वा सः जनः गच्छति ।

प्र.६) **अधोलिखित वाक्येषु रेखाङ्किकतपदानां समासं विग्रह वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवल प्रश्नचतुष्टयम्)** **(1 x 4 = 4)**

क) सीता च रामः च वनम् अगच्छताम् ।
(i) सीतारामौ (ii) सीता रामश्च (iii) सीता रामाः (iv) सीता रामयः

ख) उपक्षेत्रं गच्छति कृषकः ।
(i) क्षेत्रः समीपम् (ii) क्षेत्रस्य समीपम् (iii) क्षेत्रेयः समीपम् (iv) क्षेत्राः समीपाम्

ग) नीलकंठः हिमालये तपते ।
(i) नील कंठः यस्य सः (ii) नीलं कंठ यस्य सः (iii) नीलः कंठः यस्य सः (iv) नीलः कंठः यस्य स

घ) सः सदैव शक्तिम् अनतिक्रम्य कार्यं करोति ।
(i) यथाशक्तिं (ii) यथाशक्तिः (iii) यथाशक्तियः (iv) यथाशक्तिम्

ङ) अहं कालः विश्वस्य आत्मा अस्मि ।
(i) विश्वात्मा (ii) विश्वस्यात्मा (iii) विश्वेत्मा (iv) विश्वे आत्मा

| | |
|---|---|
| प्र.७) | **अधोलिखितेवाक्येषु रेखाङ्किकतपदांना प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत । (केवल प्रश्नचतुष्टयम्)** **(1 x 4 = 4)** |
| क) | आगता पर्वसु प्रिया दीपावली रात्रिः दीपानां प्रकाशेन उज्ज्वला भविष्यति ।<br>(i) प्रिय + टाप् (ii) प्रिय + ठक् (iii) प्रिय + तल् (iv) प्रिय घ ञ् |
| ख) | इतः पूर्वं देहल्यां श्रीमती शीलादीक्षित मुख्यमंत्री आसीत् ।<br>(i) श्रीमान + टाप् (ii) श्रीमान् + ङीप् (iii) श्रीमान् + ठक् (iv) श्रीमान् + त्व् |
| ग) | दानवता कदापि न रक्षणया ।<br>(i) दानव + तल् (ii) दानव + त्व (iii) दानव + ठक् (iv) दानव + टाप् |
| घ) | अस्य पिंडस्य घनत्वं मापय् ।<br>(i) घन + त्व (ii) धन + ठक् (iii) धन + टाप् (iv) धन + ठञ |
| ङ) | जानकी रामानन्दाचार्यस्य शिष्य + टाप आसीत् ।<br>(i) शिष्यम् (ii) शिष्या (iii) शिष्यय (iv) शिष्यता |
| प्र.८) | **मंञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवाद पुनः लिखत ।** **(1 x 3 = 3)**<br>गायत्री : सन्ध्ये ! किं त्वं ओदनं पचसि ?<br>गायत्री : सन्ध्ये (क) _______ ओदनं पचसि ?<br>संध्या : आम् ओदनः (ख) _______ ।<br>गायत्री : तदनन्तरं त्वं किं करिष्यसि ?<br>संध्या : तदनन्तरं (ग) _______ गीता पठिष्यते ।<br>गायत्री : ह्यः अहम् अपि गीतां पठितवान्<br>**मंञ्जूषा** – मया, पच्यते, मया<br>**अवा**<br>**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत । (केवलं त्रयाणाम्)** **(1 x 3 = 3)** |
| क) | रमा चित्रं पश्यति । ख) सः प्रश्नं पृच्छति । |
| ग) | वयं विद्यालयं गच्छामः । घ) रामः रावणं हन्ति । |
| ड) | बालिका पुष्पाणि चिनोति । |
| प्र.९) | **कालबोधकशब्दैः अधोलिखित दिनचर्यां वा पूरयत । (केवल प्रश्नचतुष्टयम्)** **(1 x 4 = 4)** |
| क) | लता (4.00) ________ उत्तिष्ठति गच्छति । ख) सा (4.30) ________ वादने भ्रमणाय गच्छति । |
| ग) | सा (5.00) ________ वादने गृहं प्रत्यागच्छन्ति । घ) सा (5.30) ________ वादने पठन्ति करोति । |
| ड) | सा (7.00) ________ वादने विद्यालयं गच्छति । |
| प्र.१०) | **मञ्जुषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्त स्थानानि पूरयत । (केवल प्रश्नषट्कम्)** **($^1/_2$ x 6 = 3)** |
| i) | .......... एकं विशालम उपवनम् असित । |
| ii) | वयं ......... कार्यं न कुर्याम । |
| iii) | उपवने अनेके वृक्षाः सन्ति । वृक्षेषु वानराः .......... कूर्दन्ति । |
| iv) | भारति ! तव अयं कोशः कः .......... अपूर्वः विद्यते । |
| v) | मूढः .......... हसति । |
| vi) | शिशु ......... चलति । |
| vii) | .......... मंगलवासरः आसीत् । |
| viii) | .......... बुधवासरः भविष्यति । |
| | **मंञ्जूषा** – ह्यः, श्वः, शनैः, उच्चैः, अपि, इतस्ततः, सहसा, अत्र |

| | |
|---|---|
| प्र.११) | **अधोलिखिते वाक्येषु रेखाङ्कितपदमा अशुध्दम् अस्ति । शुद्धं पदं विकल्पेभ्यः चित्वा लिखत ।** |
| | **(केवलं प्रश्नयत्रम्)** **(1 x 3 = 3)** |
| क) | <u>सः</u> लता अस्ति । (सा / स / वयं) |
| ख) | त्वया सह तव पिता अपि <u>गच्छसि</u> । (गच्छन्ति / गन्छति / गच्छतः) |
| ग) | किं त्वं तत्र श्वः <u>गच्छति</u> ? (गमिष्यसि / गामिष्यातः / गामिष्यामः) |
| घ) | त्वं कुत्र <u>गच्छामि</u> ? (गच्छसि / गच्छतः / गच्छथः) |
| | **<u>खण्ड – घ (पठित–अवबोधनम्)</u>** |
| प्र.१२) | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।** |
| | कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलिवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् । अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमान अवर्तत । सः ऋषभः हलमूढवा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्, तथापि वृषः नोत्थितः । |
| | भूमौ पतिते स्वपुत्रं दृष्टवा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् । सुरभेरिमामवस्थां दृष्टवा सुराधिपः तामपृच्छत् – "अयि शुभे ! किमेवं रोदिषि ? उच्यताम् इति ।" |
| I) | **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।** **($^1/_2$ x 2 = 1)** |
| | अ) कः क्षेत्रकर्षणं कुर्वन्नासीत् ? ब) कः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात ? क) कः क्रुध्दः आसीत् ? |
| II) | **पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्) ।** **(1)** |
| | अ) सुराधिपः किम् अपृच्छत् ? ब) मातुः सुरभेः नेत्राभ्यामश्रूणि किमर्थम् आविरासन् ? |
| III) | **प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – (केवलं प्रश्नत्रयम्)** **(1 x 3 = 3)** |
| क) | 'अनेकवारम्' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ? |
| | (i) नुद्यमानः (ii) बहुवारम् (iii) हलमुढ्वा |
| ख) | '[illegible]' इति पदस्य कर्तृपदं किम् ? |
| | (i) सुराधिपः (ii) वृषः (iii) कृषकः |
| ग) | 'वृषभम्' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ? |
| | (i) क्षेत्रकर्षणम् (ii) गन्तुम् (iii) दुर्बलम् |
| घ) | 'कृषीवलः' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम् ? |
| | (i) अवर्तत (ii) अकरोत (iii) पपात |
| प्र.१३) | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।** |
| | य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।<br>न कुर्यादहितं कर्म स परेभ्यः कदापि च ।। |
| I) | **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।** **($^1/_2$ x 2 = 1)** |
| | अ) मनुष्यः आत्मने कियन्ति सुखानि इच्छति ? ब) नरः केभ्यः अहितं कर्म न कुर्यात् ?<br>क) कीदृशं कर्म न करणीयम् ? |
| II) | **पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्) ।** |
| | अ) कः परेभ्यः अहितं कर्म न कुर्यात् ? ब) परोपकारेण कास्य श्रेयः भवति ? **(1)** |
| III) | **निर्देशानुसारम् उत्तरत – (केवलं प्रश्नत्रयम्)** **(1 x 3 = 3)** |
| क) | 'यः' इति कर्तृपदस्य क्रियापदं किम् ? |
| | (i) इच्छति (ii) कुर्यात् (iii) अन्यत् किमपि |
| ख) | 'अहितं कर्म' अनयोः पदयोः किं विशेष्यपदम् ? |
| | (i) अहितम् (ii) कर्म (iii) अहितं कर्म |

CENTRAL BOARD OF SECONDARY EDUCATION
EduCase Home of innovative education...
C.B.S.E

ग) ‘कल्याणम्’ इत्यस्य पदस्य कः पर्यायः श्लोके प्रयुक्तम ?

(i) श्रेयः (ii) अहितम् (iii) कर्म

घ) ‘निजेभ्यः’ इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम ?

(i) आत्मनः (ii) परेभ्यः (iii) श्रेयः

---

**प्र.१४) अधोलिखितं नाट्यांशः पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि लिखत -**

काकः रे परभृत ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्यु पिकाः ? अतः अहम् एव करुणापरः पक्षिससम्राट काकः ।

गजः समीपतः एवागच्छन् अरे ! अरे ! सर्वां वार्ता श्रृण्वन्नेवाहम् अत्रागच्छम् अहं विशालकायः, बलशाली, पराक्रमी च । सिंहः वा स्यात् अथवा अन्यः कोऽपि । वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यासि । किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी । अतः अहमेव योग्यः वनराजपदाय ।

वानरः अरे ! अरे ! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति !)

(गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुमिच्छति परं वानरस्तु कूर्दित्वा अन्यं वृक्षमारोहति । एवं गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपित हसति वदति च ।)

सिंहः भोः गज ! मामप्येवमेवातुदन् एते वानराः ।

**I) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।** **($^1/_2$ x 2 = 1)**

अ) काकः पिकं किं कथयित्वा सम्बोधयति ?

ब) कः आत्मानं पक्षिसम्राट् मन्यते ?

क) वानरः कुत्र आरोहति ?

**II) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्) ।**

अ) काकः किं वदति ? ब) सिंहः किं वदति ? **(1)**

**III) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्)** **(1 x 3 = 3)**

क) नाट्यांशे ‘आरोहित ’ इति क्रियायाः कर्तृपदं किम् ?

(i) वानरः (ii) सिंहः (iii) गजः

ख) ‘करुणापरः काकः’ इत्यत्र विशेष्य पदं किम् ?

(i) काकः (ii) करुणापरकाकः (iii) करुणापरः

ग) नाट्यांशे ‘दुर्बलम्’ इत्यस्य किं विलोमपदं प्रयुक्तम् ?

(i) विशालकायः (ii) बलशाली (iii) करुणापरः

घ) ‘वानराः’ इति कर्तृपदस्य क्रियापदं गद्यांशात् चित्वा लिखत ?

(i) पालयामि (ii) आरोहति (iii) तुदन्

---

**प्र.१५) रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं प्रश्नचतुष्टयम्) ।** **(1 x 4 = 4)**

क) उद्याने <u>पक्षिणां</u> कलरवः चेतः प्रसादयति ।

ख) व्यायामं कुर्वतः <u>विरुध्दं</u> भोजनम् अपि परिपच्यते ।

ग) <u>सुराधिपः</u> ताम् अपृच्छत् ।

घ) सः <u>भारवेदनया</u> क्रन्दति स्म ।

ङ) प्रीताभ्यः प्रकृतिभ्यः <u>राजानः</u> प्रति प्रियमिच्छन्ति ।

---

**प्र.१६) मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत ।**

क) व्यायामो कुर्वतो नित्यं विरुध्दमपि भोजनम् । **($^1/_2$ x 4 = 2)**

विदग्धमविदग्धं वा निर्दोषं परिपच्यते ।।

**अन्वयः** - (i) ________ व्यायामं (ii) ________ (जनस्य) (iii) ________ अविदग्धं वा विरुध्दं च अपि (iv) ________ निर्दोषं पच्यते ।

CENTRAL BOARD OF SECONDARY EDUCATION
EduCare Home of innovative education...
C.B.S.E

ख) आलस्य हि मनुष्याणां शरीरस्थो महान् रिपुः ।। **($^{1}/_{2}$ x 4 = 2)**

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।

**अन्वयः** – आलस्यं हि (i) _______ शरीरस्थः (ii) _______ रिपुः (अस्ति) (iii) _______ बन्धुः न अस्ति यं (iv) _______ (मानवः) न अवसीदति ।

| मंञ्जूषा – विदग्धम, भोजनम्, कृत्वा, उद्यमसमः, नित्यम, मनुष्याणाम्, महान्, कुर्वतः |
|---|

***अवा***

**मंञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्त स्थानानि पूरयित्वा पुनः लिखत ।** **(1 x 4 = 4)**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो, बली बलं वेत्ति न वेत्ति निर्बलः ।

पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः ।।

**भावार्थ :** गुणवान् जनः एव (i) _______ महत्वं जानाति । गुणहीनः गुणानां महत्वं न अवगच्छति । तथैव (ii) _______ जनः बलस्य महत्वं जानाति परन्तु दुर्बलः बलस्य महत्व न अवगच्छति । वसन्तः ऋतोः महत्वं कोकिलः एव सम्यग् (iii) _______ शक्नोति न तु काकः । एवमेव गजः सिंहस्य (iv) _______ महत्वं जानाति । मूषकः तस्य शौर्यम् अवगन्तुं न शक्नोति ।

| मंञ्जूषा – अवगन्तुम, बलवान्, पराक्रमस्य, गुणानाम् । |
|---|

**प्र.१७) अधोलिखित कथांशं समुचित क्रमेण लिखत ।** **($^{1}/_{2}$ x 8 = 4)**

(i) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः ।

(ii) प्रत्युत्पन्नमतिः सा श्रृगालम् आक्षिपन्ती उवाच ।

(iii) जम्बुककृतोतसाहः व्याघ्रः पुनः काननम् आगच्छत् ।

(iv) मार्गे सा एकं व्याघ्रम् अपश्यत् ।

(v) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच – अधुना एकमेव व्याघ्रं विभज्य भुज्यताम् ।

(vi) बुध्दिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता ।

(vii) 'त्वं व्याघ्रत्रयम् आनेतुं' प्रतिज्ञाय एकमेव आनीतवान्

(viii) गलबध्दश्रृगालकः व्याघ्रः पुनः पालयितः ।

प्र१८) 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' **स्तम्भे लिखितानि सन्ति । तानि यथासमक्षं लिखत । (केवलं प्रश्नत्रयम्)** **(1 x 3 = 3)**

| क | ख |
|---|---|
| हिमकरः | शिवः |
| सम्प्रति | शशिः |
| तनयः | अधुना |
| पशुपतिः | पुत्रः |

***अवा***

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत (केवलं प्रश्नत्रयम्)** **(1 x 3 = 3)**

क) एकान्ते <u>कान्तारे</u> क्षणमति सञ्चरणं स्यात् ।

(i) वने  (ii) जने  (iii) गहने

ख) दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं <u>मृजा</u> ।

(i) ऋजता  (ii) स्वच्छता  (iii) मृग्या

ग) <u>वयसस्तु</u> किञ्चिदन्तरम् ।

(i) वायसः  (ii) वयस्यः  (iii) आयुषः

घ) यः इच्छत्यात्मनः श्रेयः <u>प्रभूतानि</u> सुखानि च ।

(i) बहुनि  (ii) प्रभावपूर्णानि  (iii) पञ्चभूतानि

CENTRAL BOARD OF SECONDARY EDUCATION EduCare Home of innovative education... C.B.S.E

*~ 0 ~ 0 ~ Best of Luck ~ 0 ~ 0 ~*